SYBA Sem III Regular
1/11/18
2.30 - 5.30
pages-3

(20)

(Hours : 3) [Total Marks:100]

N.B. 1 .All Questions are Compalsory.

2. All Questions Carry Equal Marks.

१. केवलं **द्वौ** समूहौ अनुवदत -

'A' 10

1. दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ।।
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ।।

2. तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसन्धिषु जीर्णवल्कलविवरेषु महावकाशतया विश्रब्धविरचितकुलायसहस्राणि दुरारोहतया विगलितविनाशभयानि नानादेशसमागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म ।

'B' 10

1. **प्रवहणाधिरूढश्चेटः** - (प्रविश्य) रदनिके , रदनिके, निवेदय आर्यायै वसन्तसेनायै अपवारितं पक्षद्वारके सज्जं प्रवहणं तिष्ठति ।

**रदनिका** - (प्रविश्य) आर्ये, एष वर्धमानको विज्ञापयति -पक्षद्वारे सज्जं प्रवहणम् इति ।

**वसन्तसेना**- हञ्जे, तिष्ठतु मुहूर्तकम् । यावदात्मानं प्रसाधयामि ।
**रदनिका** - वर्धमानक , तिष्ठ मुहूर्तकम् , यावदार्या आत्मानं प्रसाधयति ।

2. निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः ।
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ।।
तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्गतान् ।
शुचीनाकरकर्मान्ते भीरुनन्तर्निवेशने ।।

'C' 10

1. तत्र अधिपतिरिव दण्डकारण्यस्य, नायक इव सर्ववनस्पतीनां, सखेव विन्ध्यस्य, अखिलभुवनतलावलोकनप्रासाद इव वनदेवतानाम्, कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैः, पुराणतया पतनभयादिव गगनस्कन्धलग्नः महान् जीर्णः शाल्मलीवृक्षः ।

2. **चेटः** - अरे रे ग्राम्या, अपसरत अपसरत। किं भणथ - मुहूर्तकं तिष्ठ, चक्रपरिवृत्तिं देहि इति ? अरे रे , राजश्यालकसंस्थानस्य अहं शूरः वाहकः चक्रपरिवृत्तिं दास्यामि । अथवा एषः एकाकी तपस्वी। तदेवं करोमि । एतत् प्रवहणमार्यचारुदत्तस्य वृक्षवाटिकायाः पक्षद्वारके स्थापयामि ।

२. केवलं **द्वौ** परिच्छेदौ लिखत -

A) जातकर्म - नामकरणसंस्कारौ । 10

B) वसन्तसेना । 10

C) शबराणाम् आक्रमणम् । 10

३. केवलं **द्वौ** उत्तरत -

A) **ससन्दर्भ स्पष्टीकुरुत -** 10

१. तस्य मध्ये सुपर्याप्तं कारयेत् गृहमात्मनः ।

२. जात, मा रुदिहि , सौवर्णशकटिकया क्रीडिष्यसि ।

B) **ससन्दर्भ स्पष्टीकुरुत -** 10

१. अनाथपरिपालनं हि खलु धर्मः ।

२. आर्यपुत्र एव मम आभरणविशेषः इति जानातु भवती ।

C) कयोरपि द्वयोः पुरुषार्थयोः स्पष्टीकरणं कुरुत । 10

4. केवलं **द्वौ** उत्तरत -

A) **मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत -** 10

१) अम्भःसेकं कृत्वा --------- व्यतरत् ।

२) --------- कोशराष्ट्रे च दूते संधिविपर्ययौ ।

३) अरे वीरक , मया ------ प्रलोकितं पुनरपि त्वं प्रलोकयसि ।

४) समस्तानां च ------ विदध्याद्धितमात्मनः ।

५) विराटनगरीव कीचकशतावृता ------ नाम ।

(**मञ्जूषा** - नवसञ्जीवनं , विन्ध्याटवी , नृपतौ , कार्येषु , चन्दनकेन )

B) **संस्कृतम् आश्रित्य पूर्णवाक्येन उत्तरत -** 10

१. मृच्छकटिके कति अङ्काः सन्ति ?

२. बाहुगुण्येन कं दुर्गं विशिष्यते ?

३. शुकशिशुः केन पालितः ?

४. मन्त्रिदूतोत्पत्तिः कस्य ग्रन्थस्य अंशः अस्ति ?

५. धूता का अस्ति ?

C) **युग्मानि योजयत -** 10

| | |
|---|---|
| १. भार्या | १. अप्रत्ययः |
| २. दारकः | २. शावकः |
| ३. आभरणं | ३. पुत्रः |
| ४. शिशुः | ४. अलङ्कारः |
| ५. संशयः | ५. सवर्णा |

5. टिप्पणीं लिखत ( **केवलं द्वे** ) -

A) १: ऋतुचर्या। २. जीर्णोद्यानम् । 10

B) १. अन्नप्राशन- संस्कारः । २. शुकपिता । 10

C) १. कर्णाटककलहः । २. सचिवा : । 10

-----------------





7070D8E3A90CB751FF4E99E2C5545070